# snAna saMkalpa

आचम्य, प्राणानायम्य, देशकालौ स्मृत्वा, एवं गुणविशेषणविशिष्टायां शुभतिथौ अस्मद्गुर्वन्तर्गत-परमगुर्वन्तर्गत-समस्तगुरुदेवतान्तर्गत-भारतीरमणमुख्यप्राणान्तर्गत मत्स्यकूर्मादि-अनन्तावतारात्मक-निर्दोष,अनन्तकल्याणगुणपूर्ण सीतापतिश्रीमूलरामदिग्विजयरामवेदव्यासादिरूपात्मक-भैष्मीसत्यासमेतश्रीकृष्णात्मक-एतन्मासनियामक-अनिरुद्धादिचतुर्मूर्त्यात्मक-बिम्बमूर्तिप्रेरणया बिम्बमूर्तिप्रीत्यर्थं, तथा अनन्तानन्दनिदानभूतस्य, श्वेतद्वीपेशमायापतिवासुदेवस्य परमप्रसादकारणीभूतां अत्यर्थां भक्तिं निष्पादयंति भगवदपरोक्षदर्शननिधिध्यासन-मनन-श्रवणादीनि सम्पादयितुं हरिसर्वोत्तमत्वादिज्ञानभक्तिसंप्राप्तये, अमानित्व-अदंभित्वादिज्ञानसाधनानां, अभयसत्वसंशुध्द्यादिदैवसंपदां च अवाप्तये, क्षुद्रपातक-उपपातक-महापातकानां निरासार्थं, कायिक-वाचिक-मानसिक-ज्ञाताज्ञातदोषनिबर्हणद्वारा शरीरेंद्रियांतःकरणानां संशोधनार्थं सर्वारिष्टनिवृत्यर्थं -

ब्रह्मांडबाह्यस्य चिज्जलस्य तदधिष्ठातुः, मूलनारायणस्य, अंडांतर्वर्ति-गर्भोदकस्य तदधिष्ठातुः विराडभिन्नपद्मनाभस्य, क्षीरसागरशायि तन्मध्यविराजमान-श्वेतद्वीपपति-वासुदेवस्य, चिद्रूपस्य गङ्गानाम्नः भगवतः, विष्णुपादाब्जसंभूतायाः गंगायाः तदन्तर्गत-माधवस्य, कालिंद्याः तदंतर्गत-कृष्णस्य, सरस्वत्याः तदंतर्गत-पद्मनाभस्य, नर्मदायाः तदंतर्गत-विष्णोः, कावेर्याः तदंतर्गत-रंगनाथस्य, गोदावर्याः तदंतर्गत वीरनारायणस्य, कृष्णवेण्याः जनार्दनस्य, सरस्वत्याः रामस्य, तुङ्गभद्रायाः वराहस्य, भवनाशिन्याः नृसिंहस्य, कुमुद्वत्याः त्रिविक्रमस्य, मंजुलायाः, हयग्रीवस्य, भीमरथ्याः, श्रीधरस्य, ताम्रपर्ण्याः, अनन्तस्य, मलापहार्याः, जनार्दनस्य, पिनाकिन्याः, केशवस्य

एवं नेत्रावती, कुमारधारा, पयस्विनी, सुवर्णा, वरदा, धर्मगंगा, शाल्मली, तापा, बाणगंगा, गोमती, यमुना, त्रिवेणी, फल्गु, गंगायमुनासरस्वती-सङ्गम, गंगासागरसंगम, भवनाशिनी, निवृत्तिसंगम, स्वर्णमुखी, नृपतुंगा, धनुष्कोटि, घृतधारा, तुंगा, भद्रा, घटप्रभा, मलप्रभा, सिंधु, ब्रह्मपुत्रा, गंडकी, विनता, कावेरी, कपिला, सीता, अघनाशिनी, शरावती, कागिणी, अलकनंदा इत्यादि-नदीनां तदंतर्गत-केशवादीनां,

मध्वसरोवर, मानससरोवर, परशुतीर्थ, बाणतीर्थ, गदातीर्थ, धनुतीर्थ, वासुदेवतीर्थ, दंडतीर्थ, हंपीस्थचक्रतीर्थ, नैमिषारण्यस्थ चक्रतीर्थ, विश्रांतितीर्थ, पुष्करतीर्थ, तुंबुरुतीर्थ, वामनतीर्थ, कपिलतीर्थ, पद्मतीर्थ, चंद्रतीर्थ, धवलगंगा, पापनाशिनीतीर्थ, नरसिंहतीर्थ, स्वामिपुष्करणी इत्यादि-समस्त-सरोवराणां तदन्तर्गत-दत्तात्रेयमधुसूदनादिरूपाणां

देवखातानां तदंतर्गत-गदाधरस्य, क्षुद्रापगानां तदंतर्गत-लक्ष्मीनारायणस्य, तटाकानां तदंतर्गत-शेषशायी-अच्युतस्य, वापीनां तदंतर्गत -चक्रपाणि-महाविभोः, क्षीरसागरादिसप्तसागराणां तथा सार्धत्रिकोटितीर्थानां तदभिमानिदेवतानां, बुधवरुणांतर्गत-भारतीरमणमुख्यप्राणान्तर्गत -मत्स्यत्रिविक्रमनरनारायणादिरूपाणां, स्मरणपूर्वकं तानि तीर्थानि तदभिमानिदेवताश्च, तन्नियामकभगवद्रूपाणि च अस्मिन् जले आवाहयिष्ये । ततः तत्सन्निधानोपेते अस्मिन् जलाशये स्नानं च करिष्ये ।

योऽसौ सर्वगतो देवः चित्स्वरूपी निरंजनः ।
स एव द्रवरूपेण गंगांभो नात्र संशयः ॥

नंदिनी नलिनी सीता मालती च मलापहा ।
विष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी ॥

भागीरथी भोगवती जाह्नवी त्रिदशेश्वरि ।
द्वादशैतानि नामानि यत्र यत्र जलाशये ॥
स्नानकाले पठेन्नित्यं तत्र तत्र वसाम्यहम् ।

गंगा गंगेति यो ब्रूयात् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥
गंगा सिंधु सरस्वती च यमुना गोदावरी नर्मदा
कृष्णा भीमरथी च फल्गु सरयू श्रीगंडकी गोमती ।
कावेरी कपिला प्रयाग विनता नेत्रावतीत्यादयो
नद्यः श्रीहरिपादपंकजभवाः कुर्वन्तु नो मंगलम् ॥ इति स्नात्वा

(While taking bath, the following aghamarshaNa mantra should be recited thrice ''ऋतं च सत्यं च अभीद्धात्'' and while chanting puruSha sUkta one should imagine that all the rivers, tIrthAs, sarovarAs have sprung from and rest in the nAdIs of shri viShNu and this snAna is an abhiSheka of viShNu).

अर्घ्यप्रदान- नमः कमलनाभाय नमस्ते जलशायिने ।

नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ।। (विष्णु)

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ।

अनुकंपय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते ।।(सूर्य)

ब्रह्मदंडसमुद्भूते पूर्णचन्द्रनिभानने ।

त्रैलोक्यवंदिते गंगे गृहाणार्घ्यं नमोऽस्तु ते ।।(गंगा)

Speciality in avagahana snAna -

**देवतर्पण**-ब्रह्मादयो ये देवाः तान् देवान् तर्पयामि । भूः देवान् ...भुवः देवान्...स्वर्देवान्...भूर्भुवस्वर्देवान् तर्पयामि ।

**ऋषितर्पण** - कृष्णद्वैपायनादयो ये ऋषयः तान् ऋषीन् तर्पयामि । भूः ऋषीन्.. भुवः ऋषीन्...स्वः ऋषीन्...भूर्भुवस्वः ऋषीन् तर्पयामि ।

**पितृतर्पण** - कव्यवाहनादयो ये पितरः तान् पितॄन् तर्पयामि । भूः पितॄन्... भुवः पितॄन्...स्वः पितॄन्...भूर्भुवस्वः पितॄन् तर्पयामि ।

**यक्ष्मतर्पण**- यन्मया दूषितं तोयं शारीरमलसम्भवात्। तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहम् ।। इति अर्घ्यानि दत्वा

अनेन स्नानकर्मणा भगवान् समस्तगुर्वन्तर्गत तत्वाभिमानिदेवतांतर्गत श्रीमद्भारतीरमणमुख्यप्राणान्तर्गत मत्स्यत्रिविक्रमनरनारायणाद्यभिन्न श्रीलक्ष्मीपति बिंबमूर्तिः नारायणः प्रीयताम् प्रीतो वरदो भवतु श्रीकृष्णार्पणमस्तु ।